Roll No. ....................

Total No. of Questions: 19]

**55**

[Total No. of Printed Pages: 08

# 905

## कक्षा 9 वीं परीक्षा, 2018

# SANSKRIT GENERAL

## संस्कृत सामान्यम्

Time: 03 Hours] [Maximum Marks: 100

---

*निर्देशाः*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

प्र.1 उचितं विकल्पं चित्वा लिखत– (1×5=5)

(i) स्वागतम् एतस्य शब्दस्य सन्धि–विच्छेदः अस्ति–

(अ) सु + आगतम् (ब) स्व + आगतम्

(स) स्वा + गतम् (द) सु + गतम्

(ii) गिरीशः इत्यस्मिन् पदे सन्धिः अस्ति–

(अ) यण्–सन्धिः (ब) विसर्ग–सन्धिः

(स) दीर्घ–सन्धिः (द) पूर्वरूप–सन्धिः

(iii) अत्र + एव = ..............................भवति–

(अ) अत्रेव (ब) अत्रैव

(स) अत्रएव (द) अत्रौव

(iv) अद्योलिखितेषु व्यञ्जन सन्धिः अस्ति–

(अ) विद्यालयः (ब) मनोरथः

(स) इत्यादि (द) सज्जनः

(v) तत्र एकः पुस्तकालयोऽस्ति इत्यस्मिन् वाक्ये अव्ययम् अस्ति–

(अ) तत्र (ब) एकः

(स) पुस्तकालयः (द) अस्ति



https://www.evidyarthi.in/

प्र.2 उचितं विकल्पं चित्वा लिखत– (1×5=5)

(i) अधोलिखितेषु द्वन्द्वसमासस्य उदाहरणम् अस्ति–

(अ) रामलक्ष्मणौ (ब) दशाननः

(स) यथाशक्ति (द) पञ्चवटी

(ii) ग्रामं गतः इति विग्रहस्य समासः अस्ति–

(अ) ग्रामंगतः (ब) ग्रामगतः

(स) ग्रामात्गतः (द) ग्रामेगतः

(iii) 'परोपकारः' एतस्य पदस्य समासविग्रहः भवति–

(अ) परोपकारः (ब) परेषाम् उपकारः

(स) परां उपकारः (द) परो उपकारः

(iv) अधोलिखितेषु उपसर्ग–युक्तपदम् अस्ति–

(अ) अस्ति (ब) स्तः

(स) प्राचार्यः (द) गच्छति

(v) अधोलिखितेषु उपसर्गयुक्त पदं नास्ति–

(अ) सम्मानितः (ब) प्राचार्यः

(स) दुरूपयोगः (द) रामः

प्र.3 उचितं विकल्पं चित्वा लिखत– (1×5=5)

(i) पठति इत्यस्मिन् पदे लकारः अस्ति–

(अ) लट्लकारः (ब) लोट्लकारः

(स) लङ्लकारः (द) विधिलिङ्लकारः

(ii) गमिष्यति इत्यस्मिन् पदे वचनम् अस्ति–

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अवचनम्

(iii) हसतु इत्यस्मिन् पदे धातुः अस्ति–

(अ) हसत (ब) हस्

(स) हसन (द). हसतु



https://www.evidyarthi.in/

(iv) अधोलिखितेषु शब्देषु लट्लकारस्य रूपम् अस्ति–

(अ) भवेत्   (ब) अगच्छत्

(स) क्रीड़ति   (द) पठिष्यति

(v) अधोलिखितेषु अव्ययम् अस्ति–

(अ) प्रातः   (ब) विद्यालयः

(स) रामः   (द) अस्ति

प्र.4 उचितं विकल्पं चित्वा लिखत– (1×5=5)

(i) गत्वा इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) क्तवतु   (ब) क्त्वा

(स) शतृ   (द) ल्यप्

(ii) अद्योलिखितेषु तुमुन् प्रत्ययस्य उदाहरणम् अस्ति–

(अ) गत्वा   (ब) पठनीय

(स) सेवमान्   (द) पतितुम्

(iii) अद्योलिखितेषु क्तवतु–प्रत्यान्त–पदम् अस्ति–

(अ) गतवान्   (ब) प्रणम्य

(स) गच्छन्   (द) पातुम्

(iv) सः पितरौ प्रणम्य विद्यालयं गच्छति इत्यस्मिन् वाक्ये प्रत्यययुक्त पदम् अस्ति–

(अ) सः   (ब) पितरौ

(स) प्रणम्य   (द) विद्यालयं

(v) सा.................................या विमुक्तये–

(अ) विद्या   (ब) अविद्या

(स) कुविद्या   (द) न विद्या

प्र.5 प्रदत्तशब्दैः रिक्तस्थानपूर्तिः करणीया– (1×5=5)

(i) भारत.............................................................................................कवयित्री। (रामायण / महाभारत)

(ii) हरिदत्तः कुपुत्रं दृष्ट्वा..........................................................................सञ्जातः। (सुखितः / दुखितः)

(iii) गृध्रः पक्षिशावकान्........................................................................................ (रक्षति / भक्षति)

(iv) पितरौ.............................................................................................आस्ताम्। (बुभुक्षितौ / पिपासितौ)

(v) धर्मो रक्षति............................................................................................। (रक्षितः / अरक्षितः)



https://www.evidyarthi.in/

प्र.6 निम्नलिखितेषु प्रश्नेषु त्रयाणां उत्तराणि संस्कृत भाषायाम् एक वाक्येन लिखत– (6)

(i) भारतमाता कैः वन्दिता?

(ii) विप्रः गोभिः काः गृहीष्यति?

(iii) चम्पया रोटिकाद्वयं किमर्थं संरक्षिता?

(iv) कर्मसु कौशलं किम्?

(v) सीता लक्ष्मणश्च केन सह वनम् अगच्छताम्?

प्र.7 अधोलिखितशब्दानाम् द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत– (2)

(i) 'राम' – द्वितीया विभक्तिः

(ii) 'गुरू' – प्रथमाविभक्तिः

(iii) 'फलम्' – तृतीयाविभक्तिः

(iv) 'रमा' – षष्ठी विभक्तिः

प्र.8 अधोलिखित शब्दानाम् द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत– (2)

(i) 'तत्' पुल्लिङ्गम् – द्वितीया विभक्तिः

(ii) 'किम्' पुल्लिङ्गम् – प्रथमा विभक्तिः

(iii) 'अस्मद्' – तृतीया विभक्तिः

(iv) 'युष्मद्' – प्रथमा विभक्तिः

प्र.9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि– (10)

(i) कस्मिंश्चिन्नगरे कश्चित् स्वभावकृपणः विप्रः प्रतिवसतिस्म। तेन भिक्षार्जितैः भुक्तशेषैः सक्तुभिः कलशः सम्पूरितः। तं च घटं नागदन्ते अवलम्ब्य तस्याधस्तात् खटवां निधाय सततम् एकदृष्ट्या तम् अवलोकयति।

अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास् –यत अयं घटः सक्तुभिः परिपूर्णः वर्तते तद्यदि दुर्भिक्षं भवति, तदनेन रूप्यकाणां शतमुत्पत्स्यते।

(अ) कस्मिंश्चिन्नगरे कः प्रतिवसति स्म?

(ब) कलशः कैः सम्पूरितः?

(स) विप्रः कं सततम् अवलोकयति?

(द) सक्तुभिः कति रूप्यकाणि उत्पत्स्यन्ते?

(इ) तद्यदि इत्यस्य पदस्य सन्धि विच्छेदं कृत्वा लिखत।



https://www.evidyarthi.in/

(ii) मध्यप्रदेशस्य पश्चिमे भागे मालवाञ्चले शिवनानद्यास्तीरे दशपुरं नाम नगरमस्ति। दशपुरम् अधुना मन्दसौरम् इति नाम्ना प्रख्यात–मस्ति। एतस्य दशपुरस्य वर्णनम् महाकविकालिदासेनादि स्वकीये ग्रन्थे मेघदूते कृतम्। अत्रैव शिवनानद्यास्तीरे भगवतः शिवस्य विशालमन्दिरमस्ति अत्र स्थितम् अष्टमुखाङ्कितं शिवलिङ्गम् अष्टमूर्तिः इति कथितम्। इदानीं सैव पशुपतिनाथः इति नाम्ना दशपुरे प्रख्यातः।

(अ) दशपुरं कुत्र अस्ति?

(ब) दशपुरं केन नाम्ना प्रख्यातमस्ति?

(स) शिवनानद्यास्तीरे कस्य मन्दिरमस्ति?

(द) पशुपतिनाथः कुत्र प्रख्यातः?

(इ) नद्यास्तीरे इत्यस्य सन्धिविच्छेदं कृत्वा लिखत।

(iii) जीवने तु कार्यम् आवश्यकम् अस्ति। मानवाः स्वजीवनयापनार्थं समाजसेवार्थं, देशसेवार्थं, च कार्याणि कुर्वन्ति। अस्मिन संसारे कर्त्तव्यपालनं जनस्य स्वहिताय देशहिताय सर्वहिताय च परमावश्यकम्। कर्त्तव्यपालनमेव आत्मनः देशस्य च समुन्नतेः मूलमन्त्रः।

(अ) जीवने किम् आवश्यकम्?

(ब) मानवाः किमर्थं कार्याणि कुर्वन्ति?

(स) कर्त्तव्यपालनं किमर्थम् आवश्यकम्?

(द) आत्मनः देशस्य वा समुन्नतेः मूलमन्त्र कः?

(इ) कुर्वन्ति इत्यस्मिन पदे का धातुः?

प्र.10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानां उत्तराणि संस्कृतभाषायां देयानि– (10)

(i) बुद्धेः फलं तत्त्वविचारणा च देहस्य सारं व्रतधारणं च।
अर्थस्य सारं किल पात्रदानं, वाचः फलं प्रीतिकरं नराणाम्।।

(अ) बुद्धेः फलं किम्?

(ब) व्रतधारणं कस्य सारं?

(स) अर्थस्य सारं किम्?

(द) कस्य फलं प्रीतिकरं नराणाम्?

(इ) नराणाम् इत्यस्मिन पदे का विभक्तिः?



https://www.evidyarthi.in/

(ii) विपदी धैर्यमथाभ्युदये क्षमा,

सदसि वाक्पटुता युधि विक्रमः।

यशसि चाभिरूचिर्व्यसनं श्रुतौ,

प्रकृति सिद्ध मिदं हि महात्मानाम्।।

(अ) विपदि किम् आवश्यकम्?

(ब) सदसि किम् अपेक्षते?

(स) यशसि किम् आवश्यकम्?

(द) युधि किम् अपेक्षते?

(इ) अभ्युदये इत्यत्र कः सन्धिः अस्ति?

(iii) अन्नाद्भवन्ति भूतानि पर्जन्यादन्न संभवः।

यज्ञाद्भवति पर्जन्यो यज्ञः कर्म समुद्भवः।।

(अ) अन्नात् कानि भवन्ति?

(ब) पर्जन्यात् कः सम्भवः?

(स) पर्जन्यः कस्मात् भवति?

(द) यज्ञः कस्मात् सम्भवति?

(इ) कस्मात् इत्यस्मिन् पदे का विभक्तिः?

प्र.11 उचितं युग्म–मेलनं कुरूत (केचित् चत्वारः) (4)

| | | | |
|---|---|---|---|
| (i) | दशरथः | (अ) | बाल्मीकिः |
| (ii) | शमयतु | (ब) | नार्जितं पुण्यम् |
| (iii) | रामायणम् | (स) | प्रणश्यति |
| (iv) | तृतीये | (द) | विधाता |
| (v) | बुद्धिनाशात् | (इ) | महाराजः |



https://www.evidyarthi.in/

प्र.12 शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत– (केचित् चत्वार:) (4)

(i) गोपाल: गीताया गाता।

(ii) विद्या मातेव रक्षति।

(iii) राजा बालं न लालयति।

(iv) श्रवणकुमार: पित्रो: भक्त: आसीत?

(v) सज्जनानां सङ्गति: करणीया।

प्र.13 निम्नलिखितेषु चतुर्णां प्रश्नानां उत्तराणि संस्कृत–भाषायां एकपदेन लिखत– (4)

(i) सीमान्तरक्षक: कीदृश: अस्ति?

(ii) किं धनं भ्रातृभाज्यं नास्ति?

(iii) एकां वेणीं का धृतवती?

(iv) आहारसमं किं नास्ति

(v) सत्सङ्गति पापं किं करोति?

(vi) जातस्य ध्रुवं किम्?

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठयपुस्तकात् कंठस्थीकृतं सुभाषितद्वयं लिखत। (4)

प्र.15 स्वस्य प्राचार्यस्य कृते एकदिवसस्य अवकाशार्थं प्रार्थनापत्रं संस्कृते लिखत। (4)

<u>अथवा</u>

मित्रं प्रति संस्कृते पत्रं लिखत।

प्र.16 अधोलिखितेषु 'पञ्च' अशुद्धकारकवाक्यानां शुद्धि: करणीया– (5)

(i) छात्र: विद्यालयं गच्छसि।

(ii) सैनिक: अश्वं पतति।

(iii) कृष्णं नवनीतं रोचते।

(iv) गुरूं नम:।

(v) भिक्षुकं धनं ददाति।

(vi) लक्ष्मण: रामं सह वनं गत:।



https://www.evidyarthi.in/

प्र.17 अधोलिखितेषु पञ्चवाक्यानां क्रम–संयोजनं कुरूत – (5)

(i) सः लोककल्याणार्थम् भूतले भ्रमति स्म।

(ii) एकः महान तपस्वी ऋषि आसीत।

(iii) अपरः शुकः ऋषिं दृष्टवा सीताराम इति उक्तवान्।

(iv) प्रथमः शुकः ऋषिं दृष्टवा मारयतु कट्टयतु इति उक्तवान्।

(v) दोषाः गुणाः च संसर्ग प्रभावात् उत्पन्नाः भवन्ति।

प्र.18 अधोलिखित गद्यांश पठित्वा संस्कृत भाषायां प्रश्नानां उत्तराणि लिखत– (5)

प्राचीनकालादेव पुस्तकानाम् अतीव महत्त्वमस्ति। वयं सर्वे पुस्तकानि पठामः। पुस्तकैः विविधार्थज्ञानं लभ्यते। पुस्तकानि अस्माकं मित्राणि। एतेषां सङ्गतिरतीव लाभप्रदा। अतोऽस्माभि पुस्तकानि रक्षणीयानि।

(i) अस्य गद्यांशस्य शीर्षकं लिखत।

(ii) केषाम् सङ्गतिःलाभप्रदा?

(iii) प्राचीनकालात् केषां महत्त्वमस्ति?

(iv) अस्माभि कानि रक्षणीयानि?

(v) अस्य गद्यांशस्य साराशं लिखत।

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत– (10)

(i) धेनुः

(ii) मम पाठशाला

(iii) उद्यानम्

(iv) पुस्तकम्

.......................................................



https://www.evidyarthi.in/